International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 01-02
© 2018 IJSR
www.anantaajournal.com
Received: 01-09-2018
Accepted: 02-10-2018

**Kamalendu Chandra**
Research Scholar, Rastriya Sanskrit Sansthan, Sri Sadashiv Campus, Puri, Odissa, India.

# आधुनिकसंस्कृतसाहित्ये दत्तदीनेशचन्द्रस्य अवदानम्

**Kamalendu Chandra**

## प्रस्तावना

वङ्गभूमि: सर्वदा रत्नगर्भा, अत्र युगे युगे वहुसुसन्तानगण: अजायत दत्तदीनेशचन्द्रोऽपि बङ्गजनन्या: एक: सुसन्तान: आसीत् । अनन्यभाषाविद: दत्तदीनेशचन्द्रस्य जन्म: अविभक्तवङ्गदेशे १८९२ ईशवीयसंवत्सरे अभवन् । शिक्षाया: पूर्वभाग: महाविद्यालयोऽवधि शिक्षा वङ्गदेशस्य हावीवगञ्जे तथा राजशाहीनामकस्थाने सम्पन्नोऽभवत् । अत्रान्तरे उच्चशिक्षालाभार्थं कोलकातायाम् आगतवान् । १९१६-आङ्गलवर्षे कोलिकाताविश्वविद्यालयात् प्राचीन आङ्गलाभाषायाम् एम्.ए उपाधिं लब्धवान् । अत्रान्तरे पुन: १९२१-आङ्गलवर्षे आधुनिक आङ्गलसाहित्ये एम.ए. उपाधिं लब्धवान् । आवाल्यात् संस्कृतभाषायां प्रति दीनेशचन्द्रस्य आकर्षणमासीत् । १९१६-१९२१ आङ्गलवर्षाभ्यन्तरे दीनेशचन्द्रमहोदय: ग्रीक-लैटिन-फ्रेन्च हीव्रू-आरवीभाषास्वपि विशेषोऽध्ययनं कृतवान् तथा पाण्डित्यं लव्धवान् । कर्मजीवनस्य प्रारम्भे मेदिनीपुरमहाविद्यालये अध्यापनाकर्मं अकरोत् । अत्रान्तरे जयपुर महाराजाकलेजे च अयम् आङ्गलभाषाया: अध्यापक: आसीत् । जयपुरस्थ महाराजामहाविद्यालये १९५१ कालावधि अध्यापनाकर्मणि निरत: आसीत । दीनेशचन्द्रस्य अधिकांशरचना आङ्गलभाषायाम् एव रचिता: । १९४३ ईशवीयसंवत्सरे संस्कृते प्रकाशितम् अस्य प्रथमं काव्यं ‘भारतगाथा’ इति । प्रकाशनाकाले महामहोपाध्यायभट्टमथुरानाथशास्त्रिणाऽपि प्रशंसितं वर्तते । दत्तदिशचन्द्रस्य संस्कृतमौलिकरचना: सन्ति -
भारतगाथा (१०० श्लोका:), सुभाषचरितम् (१७४ श्लोका:), वङ्गविभावरी (२२० श्लोक:), रवीन्द्रप्रतिभा (१९४ श्लोका:), छन्द: सन्दोह: (लोकिकछन्दसंक्रान्तग्रन्थ:)

**भारतगाथा :-** दीनेशचन्द्रस्य ‘भारतगाथा’ शतककाव्यमेकं वर्तते । अस्मिनकाव्ये मन्दाक्रान्ता छन्देन भारतवर्षस्य अतीतगोरवस्य तथा वर्तमानदुरावस्थाया: चित्रं प्रदर्शितम् । रचनाया: प्रारम्भभागे-सरस्वती-कृष्ण-राम-परशुरामस्य च वन्दना कृता । अत्रान्तरे शंकराचार्य-श्रीचैतन्यमहाप्रभु इत्यादिवहुयुगपुरुषाणां वन्दना, तत: राष्ट्रस्य उन्नयनमूलककार्यस्य मनोरमवर्णना अस्ति । आधुनिकसमाजस्य भ्रष्टाचारं प्रति कवि: आत्मन: क्षोभं प्रकाशयति तथा प्राचीनभारतवर्षस्य गौरवमयचित्रं सगौरवं प्रदर्शयति, यथा –

> कृष्णप्रणा: स्वपतिविमुखा क्वाधुना गोपिकास्ता:
> कुत्र श्यामो मदनदमनो राधिकाप्रेमलक्ष्य: ।
> वंशीधरी रतिपतिजयी साम्प्रतं क्वास्ति दृश्य:
> कालिन्दी च क्व पुनरधुना सोर्ध्ववारिप्रवाहा’’ ।।१

समग्रकाव्ये मातृभूमिं प्रति अनुरागस्य दृश्यम् अतीवसुन्दररूपेण उपलभ्यते । भारतमाता एका रत्नगर्भाभूमि:, अत्र सिंहासादृशा वीरा: पुत्रा: अजायन्त युगे युगे, किन्तु अधुनाभारतवर्षस्य पूर्ववत् अवस्था नास्ति । भारतवर्षस्य वर्तमानदुरवस्थया कवि: व्यथित:, किन्तु स आशावादी, अत तेन उक्तम् –

> ‘‘श्यामच्छाया: दलितमहिषा मुण्डमालां दधना
> मत्स्याजीवै: कथमनुकृतैर्म्लानपुष्पैरिहार्च्या ।
> सूत्वा सिंहान् किमिह जननी फेलवाणामसि त्वं
> धीर: संखे स्थिरनिजमहा मङ्क्षु हन्यादरातिम्’’ ।।२

**Correspondence**
**Kamalendu Chandra**
Research Scholar, Rastriya Sanskrit Sansthan, Sri Sadashiv Campus, Puri, Odissa, India.

अस्मिन् काव्ये पदेषु पदेषु मातृभूमिं प्रति कवे: अनन्य भक्तिभावना परिस्फुरति । कवि आत्मन: अश्रुसिक्तनयनेन मातृभूमे: मानसपूजां करोति । यथा –

''आनीताऽद्याश्रुजलविशद: कण्ठहारस्त्वदर्थं
भित्वा वक्षो रुधिरमपि ते पादपद्मार्चनायै ।
वस्त्रं चैतन्मलिनमलिनं कल्पनातन्तुवीतं
नान्यत् किञ्चित् त्वदपचितये साधनं मेऽस्ति मात: ।।''३

**सुभाषचरितम् -** काव्यमिदं १९६८ ईशवीयसंवत्सरे प्रकाशितवान् । अत्र १७४ श्लोका: विविधछन्दोवैचित्रेण विलसन्ति । सम्पूर्णकाव्ये सुभाषचन्द्रवोसस्य ओजस्वीचरित्रम् प्रदर्शयति कवि: । अस्या रचनायां वीररसस्य तथा गौडयरीते: मेलवन्धनम् अतीवसुन्दरम् अस्ति । रचनाया विभिन्ननांशे कवे: काल्पनिकप्रयोगा: अलंकारसंयोगाश्च अतीवमनोहरा: वर्त्तन्ते । राष्ट्रनायकसुभाषचन्द्रस्य काव्यिकचित्रम् अनुभूतिप्रवणतयासह ऊर्जस्वी तथा प्रेरणापदरूपेण प्रदर्शयति –

''नवनीतसुदासमचित्तविनोदनरीतिणाढ्यतयावसितं
त्वमनन्तसहायकशक्तिविनायकशूरषडाननवद्रिपुहा ।
त्वमनारतजिद्भुवि शक्तिधरोपमशौर्यगणाधिपतुल्यबलो
नवभारतनाविक: रक्षतु ते रणनीतिरनाविकनावमिमाम् ।।''४

**रवीन्द्रप्रतिभा: -** रवीन्द्रप्रतिभाकाव्ये कविदत्तदीनेशचन्द्र: रबीन्द्रनाथठाकुरविषये लिखति । अस्मिन् काव्ये १७४ श्लोका: १४९ विविधछन्दभि: सन्ति । अत्र विविधछन्दसां प्रयोगेन कवे: प्रतिभा: प्रतिभाति । कवीन्द्ररवीन्द्रनाथस्य कृतित्वं तथा व्यक्तित्वञ्च अत्त्युतमं चित्रितम् । कवीन्द्ररवीन्द्रनाथस्य काव्यवाणी तथा आभ्यन्तरीणदार्शनिकचिन्तनस्य उपलब्धिं कृत्वा कवि: काव्यमिदं रचयति । यथा –

''कविजीवनं सततमाहुतिदानं
क्षणिकं सुखे तनुभृतां परमिष्टम् ।
सुखमिच्छतां सततदु:खमवस्यं
स्मरणीयमेतदपरं रविवाक्यम् ।।''५

अनेन श्लोकेन रवीन्द्रनाथस्य आध्यात्मिकदार्शनिकचिन्तनस्य सुष्ठु प्रकाश: उपलभ्यते ।

**वङ्गविभावरी -** काव्यमिदं १९६८ ईशवीयसंवत्सरे प्रकाशितम् । अत्र २२० विविधश्लोका: तथा २१२ विविधछन्दांसि सन्ति । 'नृत्यवति' तथा 'सौदामनी' इति नाम्ना अभिनवछन्दसो: प्रयोगोऽत्र उपलभ्यते । ग्रन्थे प्रयुक्तस्य अप्रचलितछन्दस्य कानिचित् निदर्शनम् प्रदर्शन् -
१) नवपटपटिमविकृतनिरवधिमुररसनटनरटनविगलितमनसि ।
का शिक्षा का वा दीक्षा शक्ष्यत्युप्तुंवीजंनिष्पापम् ? (ज्योतिछन्द:)
२) भृशमनुकरणरतविटिपिमृग इव किमपि पिपतिषुरसुनिहननतमसि ।
सुधियमनुकुरु विहर मनसि महति यदि चिचरिषुरमरपथि नवजगति ।। (गीत्यार्याछन्द:) ।

**छन्द: सन्दोह: -** कविदीनेशचन्द्रस्य छन्दोविषये असाधारणं पाण्डित्यमासीत् । अस्मिन् ग्रन्थे कवे: दीनेशचन्द्रस्य छन्दविषयेप्रतिभा प्रकटयति । अत्र कविना विविधछन्दसां लक्षनादि स्वरचित उदाहरणसमूहं प्रकाशयति । अनेन ग्रन्थेन दीनेशचन्द्रस्य छन्दोविषयेषु असाधारणोऽधिकार: प्रकाशित: ।

अधुना प्रचुरं साहित्यं संस्कृतभाषाया विरचितम् । आधुनिकं संस्कृतसाहित्यं परिमाणेन गुणवत्तया च सर्वथा महीयते । एषामाधुनिककवीणां मध्ये दत्तदीनेशचन्द्र: एक: स्वतन्त्र: कवि: । कविदीनेशचन्द्र आसीत् आङ्गलभाषाध्यापक: तथा वहुभाषावित् । एकस्य आङ्गलभाषाविषये उच्चशिक्षितजनस्य संस्कृतभाषां प्रति अनुरागात् दत्तदीनेशचन्द्र: सफलकविरूपेण आधुनिकसंस्कृतसमाजे परिज्ञायते । एतत् भिन्न छन्दोविषये वहुना वैचित्रपूर्णप्रयोगेन दत्तदीनेशचन्द्र: आधुनकसंस्कृतकविषु विशिष्टासनं लभते ।
सर्वासु रचनासु भाषाया: उत्तमप्रकाश: तथा लालित्येन सह विषयविन्यास: इत्यादिकारणेन दत्तदीनेशचन्द्र: आधुनिककविषु उल्लेखयोग्य: । आधुनिककवे: दत्तदीनेशचन्द्रस्य रचनासमूह: कोलिकातास्थितविभिन्नग्रन्थागारे अस्ति । तस्य रचनासमूह: आधुनिकगवेषकाणां गवेषणाया: विषय: स्यात् ।

**पादटीका**

१) भारतगाथा श्लोकसंख्या-१२
२) भारतगाथा श्लोकसंख्या-५९
३) भारतगाथा श्लोकसंख्या-७१
४) सुभाषचरितम् श्लोकसंख्या-९६
५) रवीन्द्रप्रतिभा श्लोकसंख्या-६९

**सहायकग्रन्थसूची**

१. उपाध्याय, आचार्य श्री वलदेवसंस्कृत वाङमय का वृहत् इतिहास (प्रधानसम्पादक) सप्तमखण्ड आधुनिकसंस्कृतसाहित्यका इतिहास पाठक, जगन्नाथ. उत्तरप्रदेश संस्कृत संस्थान, लक्ष्नौ, २००० (सम्पादक)
२. दाश:, नारायण. संस्कृतसाहित्येपश्चिमवङ्गस्यावदनाम् कथाभारतीयप्रकाशन्, कोलकाता. २०१३
3. Chattopadhyay, Rita. 20th Century Sanskrit literature Sanskrita Shahitya Parishat, Kolkata
4. Satapathy, Harekrishna. 20th Century Sanskrit Poets and their (General Editor) contribution (vol-1) Ranganath, S. (author) Rashtriya Sanskrit Vidyapeetha (Editor) Tirupati, 2011